# Naradaproktam Shivalingarchanamahimanuvarnanam

# નારદપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમાનુવર્ણનમ્

## Document Information

Text title : Naradaproktam Shivalingarchanamahimanuvarnanam

File name : shivalingArchanamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 10 | 31-43 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# નારદપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમાનુવર્ણનમ્

પ્રભાવઃ શિવલિઙ્ગાનામપારઃ તસ્ય વર્ણનમ્ ।
ન મયા નામરૈર્વાપિ વેદૈરપિ ન શક્યતે ॥ ૩૧॥

શિવલિઙ્ગપ્રભાવજ્ઞઃ કોઽપિ લોકત્રયે મહાન્ ।
ભવિષ્યતિ ન વા નાસ્મન્મનસ્તદ્વર્ણનક્ષમમ્ ॥ ૩૨॥

ન વાચાં વિષયસ્તાવલ્લિઙ્ગવર્ણનમિત્યતઃ ।
વેદાન્તાસ્તત્ર વિશ્રાન્તાઃ કૃતાન્તાન્તકકીર્તનાત્ ॥ ૩૩॥

યસ્મિન્ મતિર્યસ્ય ભવેત્ શિવલિઙ્ગાવલોકને ।
સ તાવદ્ધન્ય એવેતિ કાલોઽયં સુતરામપિ ॥ ૩૪॥

લિઙ્ગરૂપં સમાસાદ્ય રમતે ગિરિજાપતિઃ ।
લિઙ્ગરૂપં પ્રિયં તસ્ય લિઙ્ગં ગૃહ્ણાતિ પૂજનમ્ ॥ ૩૫॥

લિઙ્ગં મઙ્ગલદત્વેન યેન જ્ઞાતં મહાત્મના ।
સ મઙ્ગલાપતિં યાતિ તજ્જ્ઞાનમતિદુર્લભમ્ ॥ ૩૬॥

લિઙ્ગ મઙ્ગલદં વિદુર્મુનિવરાઃ સર્વે સુરાઃ કિન્નરાઃ
સિદ્ધાઃ કિમ્પુરુષા ગણાશ્ચ વિવિધાઃ શેષાદયોઽપ્યન્વહમ્ ।
તલ્લિઙ્ગાર્ચનતત્પરાઃ પરમિદં લિઙ્ગં યતઃ સર્વદા
સર્વાર્થપ્રદમિત્યવૈમ્યહમપિ પ્રાગ્જન્મપુણ્યૈર્નૃપ ॥ ૩૭॥

લિઙ્ગાનામિદમુત્તમોત્તમતમં લિઙ્ગેષુ તત્પૂજયા
સાક્ષાત્ પૂજિત એવ તેન સદૃશં લિઙ્ગં ન ભૂમણ્ડલે ।
તદ્બિલ્વીનવપલ્લવૈરનુદિનં યેનાર્ચિતં સાદરં
ભક્ત્યા તત્ સકૃદેવ વા સ હિ મહાન્ માન્યો મહેશપ્રિયઃ ॥ ૩૮॥

યઃ પ્રાતઃ પ્રયતઃ પ્રપશ્યતિ મુહુર્લિઙ્ગં વિભૂત્યા પરં
પૂતઃ સન્ પ્રણતઃ સ્વતોઽપિ પરતો મુક્તો ભવેત્ પાતકૈઃ ।
તલ્લિઙ્ગં વિમલૈર્જલૈરભિનવૈઃ બિલ્વીદલૈરર્ચયન્

ચર્ચામેવ ન સંસૃતેઃ ખલુ કરોત્યાકલ્પમન્તેઽપિ વા ॥ ૩૯॥

લિઙ્ગારાધનપુણ્યરાશિરસકૃત્ વૃદ્ધઃ પ્રવૃદ્ધઃ પુનઃ
સંસારાર્ણવશોષકઃ ખલુ મહાપાપૌઘવિધ્વંસકઃ ।
તેનૈવામૃતતામુપૈતિ સ પુનઃ સંસારવાર્તારસં
ન સ્વપ્નેઽપિ સ પશ્યતીતિ સ મહાન્ લિઙ્ગાર્ચકો ભૂપતે ॥ ૪૦॥

લિઙ્ગાર્ચકેન સદૃશો ન મહાધ્વરાણાં કર્તાપિ તસ્ય તુ ફલં ખલુ તુલ્યમેવ ।
સ્વર્ગાત્મકં શિવપદામ્બુજપૂજકસ્ય તત્તાવદિષ્ટમપિ નેતિ વદન્તિ સિદ્ધાઃ ॥ ૪૧॥

યો રમ્ભાપરિરમ્ભણેઽપિ શુનકીતુઙ્ગાઙ્ગસઙ્ગેઽપિ વા
તુલ્યત્વં મનુતે શિવાર્ચનપરઃ સ સ્વર્ગવાઞ્છાં કથમ્ ।
કર્તું વા યતતે વિરક્તમનસાં તત્રાપ્યપેક્ષા કથં
મોક્ષેચ્છા પરમસ્તિ તસ્ય સતતં લિઙ્ગાર્ચકસ્ય ધ્રુવમ્ ॥ ૪૨॥

લિઙ્ગારાધનમેવ સાધુમનસાં તાવદ્ધનં તદ્ધનં
સર્વેષાં સમપેક્ષિતં યદિ ભવેત્ મુક્તોઽપિ સર્વસ્તતઃ ।
તસ્માત્ કસ્યચિદેવ ભૂરિતપસાં પુઞ્જસ્ય તત્સાધનં
તત્તાવદ્ધનમક્ષયં નિધિમપેક્ષ્યૈવાર્જિતં સજ્જનૈઃ ॥ ૪૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૦। ૩૧-૪૩ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 10. 31-43 ..

Notes:
Nārada નારદ narrates to Magadharāja મગધરાજ, the merits of conducting worship of Śivaliṅga શિવલિઙ્ગ.

Proofread by Ruma Dewan

*Naradaproktam Shivalingarchanamahimanuvarnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*